काव्यकण्ठगणपतिमुनिकृत
श्रीरमणचत्वारिंशत्



श्री लक्ष्मीधर ... पुस्तकालय मन्दिर.
देवप्रयाग, (उत्तराखण्ड-हिमालय)
व्यवस्थापक:—
चक्रधर जोशी.


PUBLISHED BY
NIRANJANANANDA SWAMI
SARVADHIKARI, SRI RAMANASRAMAM
TIRUVANNAMALAI

1936

All Rights Reserved
by the Publisher

Price : One Anna

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri



भगवान् श्री रमणमहर्षि

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

॥ श्रीरमणचत्वारिंशत् ॥



1. कथया निजया कलुषं हरता
करुणानिधिनाऽरुणशैलजुषा ।
खगवाहनभाषिततत्त्वविदा
वृषवाहनमौनरहस्यभृता ॥

2. गणराण्मुखसूरिसभागुरुणा
गुणसञ्चयरत्नमहोदधिना ।
घनगूढसहस्रकरेण यथा
तनुकञ्चुकगुप्तमहामहसा ॥

3. चतुरेण चलेन्द्रियनिग्रहणे
पटुना परकीयगुणग्रहणे ।
छलवर्जितमौनसमाधिजुषा
बलतर्जितभीकरकामरुषा ॥

4. जठरं समये परिपूरयता
कठिनं व्रतमद्रितटे चरता ।
झषकेतनशस्त्रदुरापहृदा
कृषिमात्मविबोधविधौ दधता ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

5. भवभीकरवारिनिधिं तरता
करतामरसेन सुपात्रवता ।
स्वदृशाऽधिकशीतलकान्तिभृता
भयमङ्घ्रिसरोजजुषां हरता ॥

6. नमतामतिभक्तिमतां निधिना
घनतापविधूननसन्निधिना ।
यतिधर्मततिं परिपालयता
परितश्च तमो विनिवारयता ॥

7. फणिनायकवर्ण्यगुणौघभृता
भणितीः प्रियसत्यहिता भणता ।
बहुमानवशादयता सुखिता-
मवमाननतेरविदूनवता ॥

8. यतिनामधिपेन कुशाग्रलस-
न्मतिना धृतिनाशितचित्तभुवा ।
लहरीप्रमदस्य सदावहता
निहतान्तरशात्रवसंहतिना ॥

9. भगवत्पदमन्य जनासुलभं
स्वगुणैरधिगत्य परं जयता ।
ममतारहितेन हितेन सतां
निहितेन गणप्रभुणा हृदये ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

10. धरणीधरजाङ्कमपित्यजता
धरणीतलवासितमोधुतये ।
नरवेषभृता नगरन्ध्रकृता
रमणेन सनाथमिदं भुवनम् ॥

11. परदेशिनेव धवलेन वाससः
शकलेन वेष्टितकटीविशोभिना ।
वरदेशिकेन नरवेषधारिणा
शिखिवाहनेन गुरुमज्जगद्भवेत् ॥

12. अतीतगुणजालाय
नैष्ठिक ब्रह्मचारिणे ।
नमो मायामनुष्याय
गुरवे तारकारये ॥

13. यानायात्र न केकिनांकुलपतिः स्नानाय न स्वर्णदी
पानाय क्षितिभृन्महेन्द्रदुहितु र्नस्तन्यदुग्धामृतम् ।
गानाय प्रमथेश्वरास्सवयसो नैवात्रवीणाभृतो
वासं शोणगिरौकरोषि भगवन् क्रौञ्चाद्रिभेत्तः कुतः ॥

14. एकं वक्त्रमुमाङ्कवासविरहः पाणौ न शक्त्यायुधं
मर्त्यत्वं नपताकिनीच पृतना पार्श्वद्वये नाकिनाम्।
वेषोऽलं पुनरेषमुग्धनयनप्रच्छादने भूजुषा-
मन्तर्धानमुपैषि तारकरिपो क स्तन्यदायादतः ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

15. केचिद्योगविदां पुरःसर इति प्रज्ञानिबुद्ध्या परे
साधुः कश्चिदितीतरे गुरुधिया केप्यङ्घ्रिपद्मं तव।
सेवन्ते रमणाभिधान मनुजक्षेमाय जात क्षितौ
द्वित्रास्त्वां गिरिजाङ्कपीठनिलयं जानन्ति देवं गुहम् ॥

16. ओंकारार्थमुपादिशो भगवते वाणीमनोहारिणे
तातायाप्युपदेष्टु मुद्यतमभूत् किंचित्त्वदीयं मुखम्।
ज्येष्ठस्याद्य सहोदरस्य गुरुतां प्राप्तोसि धीगौरवात्
सुब्रह्मण्य कनिष्ठता मपि गतः सर्वाधिकस्त्वं गुणैः ॥

17. यत्पूर्वं श्रुतिपारदर्शिधिषणो द्वैपायनोऽध्यारुहत्
पश्चाद्बोधकलाविधूततिमिरः शङ्कापहश्शङ्करः।
तत्सम्प्रत्यखिलावनीतलजुषा माचार्यसिंहासनं
देव त्वां प्रतिवीक्षते नरतनोगीर्वाणसेनापते ॥

18. धर्मे नाशमुपागते त्रिभुवने पर्याकुले पापतः
प्रज्ञाने परितो गिरां पथि मुधा सञ्चार्यमाणे जनैः।
सद्भावे परमेश्वरस्य च पितुः सन्देहडोलां गते
द्वीपः कैतवमर्त्य केकितुरग त्वामन्तरा कस्सताम् ॥

19. वैराग्यं तव वित्तमस्तु करुणां शक्नोषि हातुंकथं
दृष्यस्तेऽस्तु समुद्यमः पितृपदध्यानं च किं तादृशम्।
कामस्तेऽस्तु विगर्हितो विनमतां रक्षा च किं गर्हिता
स्कन्द च्छद्ममनुष्य किंनु समयं कञ्चित्समुद्वीक्षसे ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

२७९
संस्कृत
९२

20. दूरं याहि कुवाद धर्मवृष ते नेतः परं पङ्गुता
दुर्भ्रान्ते भुवनं जहीहि परितो वर्धस्व संसत्सताम्।
सौंदर्येण समन्वितो भुवमिमां प्राप्तो गुरुग्रामणीः
शूरान्तःपुरनेत्रविभ्रमहरो देवो भवानीसुतः॥

21. जन्मस्थानमवाप्य गुप्तमहमो यो भेदमाधूतवान्
भूतानां चरतां पृथग्विधधिया मात्मैव यो भासते।
देहं सर्वमिदं जगच्च विभवा दाक्रम्य यः प्रोल्लस-
त्येकस्तं गुरुमूर्ति मानमत रे लम्बोदरभ्रातरम्॥

22. अन्तर्यश्च बहिर्विधूततिमिरं ज्योतिर्मयं शाश्वतं
स्थानं प्राप्य विराजते विनमता मज्ञानमुन्मूलयन्।
पश्यन्विश्वमपीद मुल्लसति यो विश्वस्य पारे पर-
स्तस्मै श्रीरमणाय लोकगुरवे शोकस्य हन्त्रे नमः॥

23. प्रसरतादितः शुभविलोकितम्।
रमण ते सकृ त्फलतु मे कृतम्॥

24. रमण जन्मिना मयि भवान्गुरुः।
अभिद आशय स्तव महानुरुः॥

25. जगदहं परः स्फुरति मे त्रयम्।
सदभिदं गिरा तव विसंशयम्॥

श्रीलक्ष्मीधर-विद्यामन्दिर
CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

26. त्वदुपदेशतो गलति संविदा ।
मयिनिरन्यया सदहमो भिदा ॥

27. अहमि योऽन्तर स्तममलं हृदि ।
अनुभवेमभो स्तवकृपा यदि ॥

28. न करुणा गुण स्तव विदांपते ।
हृदयतेजसः सहजभैवते ॥

29. तव तनुर्ज्वल त्यनघ विद्युता ।
तव दृगातता लसति भास्वता ॥

30. कवलितं मन स्तव विभो हृदा ।
त्वमसि सन्ततं विलसितो मुदा ॥

31. भुवनभूपते भगवतः कृते ।
भवसि पाचको यमवतां पते ॥

32. नरपशूनिमा नहमि ताडयन् ।
परशिवौदनं वितनुषे पचन् ॥

33. तिमिराणि न केवलं वचोभिः
करुणापाङ्गविलोकितैश्च नृणाम् ।
हृदये प्रसरन्ति मर्दयन्तं
भगवन्तं रमणं गुरुं नमामि ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

34. भवजलनिधिं गाहं गाहं चिरादलसालसान्
पदजलरुहद्वन्द्वद्वीपं श्रितांस्तव सम्प्रति ।
रमणभगवन् कल्याणानां निकेतन पाहि नः
सदय दयया सिक्तै र्भक्ता नपाङ्गविलोकितैः ॥

35. यदि न जननी स्तन्यं दद्या च्छिशो र्वत का गतिः
यदि पशुपतिः क्रोधं कुर्यात्पशोरवनं कुतः ।
यदि पदजुषा माचार्य त्वं निहंसि न संशयं
भ्रमशतपराभूता एते तरन्तु भवं कथम् ॥

36. विशदहसिते पूर्णाशान्तिः सुधाकरसोदरे
स्थिरपृथुलयोः पूर्णाशक्ति र्दृशोरतुलार्चिषोः ।
हृदयकमले नित्या निष्ठा बहिश्च सरत्प्रभे
रमणभगवन् को वा मौनी समस्तव भूतले ॥

37. देवी शक्तिरियं दृशोः श्रितजनध्वान्तक्षयाधायिनी
देवी श्रीरियमम्बुजाक्षमहिषी वक्त्रे सहस्रच्छदे ।
देवी ब्रह्मवधूरियं विजयते व्याहारगूढा परा
विश्वाचार्य महानुभाव रमण त्वां स्तौतु कः प्राकृतः ॥

38. सोहं जातो रमणभगवन् पादयोस्ते दविष्ठो
यद्यप्यस्मिन्महतिसमये शक्तिलास्ये प्रवृत्ते ।
सूर्यस्येव ज्वलितमहसो दूरगां नाथ शक्तिं
विश्वस्याग्र्यां तव मम मनो वीतदुःखं तथापि ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

39. तद्भागधेयमसमान मनेकमौनि-
वासार्जितं क्षितिभृतःखलु लोहितस्य ।
अङ्गीचकार भगवान् रमणो महर्षि-
रन्येषुसत्सुयदिमं बहुषु स्थलेषु ॥

40. शान्ति र्नितान्तमधिका परमास्य शक्ति-
र्वैराग्यमद्भुततमं करुणा तु सान्द्रा ।
ज्ञानं निरस्तकुहनं मधुरं च वृत्तं
नृणां निदर्शनमयं रमणो महर्षिः ॥


नारसिंहिर्गणपति र्वासिष्ठो रमणं गुरुम् ।
चत्वारिंशन्मितैः पद्यैः स्कन्दांशं स्तुतवानृषिम् ॥



श्री लक्ष्मीधर - निवासमन्दिर.
देवप्रयाग, (गढवाल-हिमालय)
व्यवस्थापक :—
आचार्य पं. चक्रधर जोशी.

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri



आचार्य पं. चक्रधर जोशी.

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri